# वार्तापत्रकम्

**शिक्षमन्त्रालयद्वारा ३०-सप्टेम्बर-१-ऑक्टोबर-२०२३ इति दिनद्वये भारतीयभाषोत्सवस्य प्रक्षेपणं "प्रौद्योगिकी भारतीयभाषाश्च" इति विषये द्वि-दिनात्मक-परिषदः आयोजनं च।**

अथ शिक्षमन्त्रालयः भारतीयभाषोत्सवं प्रक्षेपयिष्यति, ३०-सप्टेम्बर-१-ऑक्टोबर-२०२३ इति दिनद्वये च ७५-दिनात्मक-भारतीय-भाषोत्सवस्य भागत्वेन "प्रौद्योगिकी भारतीय-भाषाश्च" इति विषये द्वि-दिनात्मक-परिषदः आयोजनं करिष्यति। भारतीय-भाषोत्सवस्य भागत्वेन समायोजितायाः अस्याः परिषदः उद्घाटनं मान्यः शिक्षामन्त्री श्री-धर्मेन्द्र-प्रधान-महोदयः नवदेहल्यां राजेन्द्रप्रसादमार्गे डॉ.-बी.-आर्-अम्बेडकर-आन्ताराष्ट्रिय-केन्द्रे करिष्यति। बीजभाषणं च काञ्चीपुरस्थ-भारतीय-सूचना-प्रौद्योगिकी-अभिकल्पना-तथा-विनिर्माण-संस्थानस्य शासि-मण्डलस्य अध्यक्षः श्री-श्रीधर-वेम्बु-महोदयः करिष्यति।

अस्यां परिषदि त्रीणि विषयसत्राणि भविष्यन्ति, यथा (१) भारतीयभाषाणां कृते प्रौद्योगिकी, (२) भारतीयभाषासु प्रौद्योगिकी, (३) भारतीयभाषाभिः प्रौद्योगिकी च इति। एतेषां विषयाणाम् आयामाः अध्यापनम्, अध्ययनं, सेवापूर्वं सेवान्तर्गतं च प्रशिक्षणं, शिक्षकाः, पाठ्यपुस्तकलेखकाः, परीक्षकाः, तज्ज्ञाश्च, ज्ञानपरीक्षा, क्षमतापरीक्षा च एत्येतेषु भारतीयभाषाणां कृते प्रौद्योगिक्याः उपयोगं श्रेयःप्रदानं, अध्ययनाध्यापन-साहित्यानाम् अनुवादम्, अन्ततश्च विद्यमान-पद्धतेः नवशिक्षानीतिः-२०२० इति प्रणाल्यां संकल्पितायां परिव्यवस्थायां संक्रमणस्य निश्चितिः अत्र उद्दिश्यते।

अस्यां द्विदिनात्मिकायां परिषदि भारतीयभाषासु शिक्षणस्य दृष्टिं संप्राप्तुं परिपालयितुं च सर्वैः भागधारिभिः शिक्षाक्षेत्रीयं पथचित्रं निर्मास्यते। अपेक्ष्यते यदियं परिषद् विविधक्षेत्रगतैः एकसहस्रं जनैः सहभागः करिष्यते, यथा शिक्षासंस्थानानि, छात्राः, शोधच्छात्राः, शिक्षाप्रौद्योगिकी, सूचनाप्रौद्योगिकी, प्रौद्योगिकीज्ञाः, माध्यमानि, स्वतन्त्राश्च जनाः इत्यादयः। परिषदः आयोजनं शिक्षा-मन्त्रालयः, कौशल-उद्योजकता-विकास-मन्त्रालयः, तयोः अन्तर्गताः संस्थाः, यथा भारतीय-भाषा-संस्थानम्, विश्वविद्यालय-अनुदान-आयोगः, राष्ट्रिय-शिक्षा-प्रौद्योगिकी-मञ्चः, अखिल-भारतीय-प्रौद्योगिक-शिक्षा-परिषद्, राष्ट्रिय-व्यावसायिक-प्रौद्योगिक-शिक्षा-केन्द्रम्, राष्ट्रिय-शिक्षक-प्रशिक्षण-परिषद्, भारतीय-भाषा-समितिश्च इत्येतैः करिष्यते। परिषदः आन्तर्जाल-पृष्ठम् - https://technology-bharatiyabhasha.aicte-india.org